# Lesson 32. Ooooooo!! What fun! (उकारान्त words.)

Yup! Have resurfaced yet again! Trust you have had a wonderful Jan and Feb and are all set to continue with our lessons.

Sanskrit Upasana has been a most rewarding experience and has equipped me with a greater insight into interactive teaching(or so i think!) i hope that it will reflect in my lessons henceforth. So keep your fingers crossed.
Many more have joined us these last two months and to everyone of you a very warm welcome. Many more have reached lesson 31 and i think it's time we get back to work.....

There are plenty of उकारान्त and ऊकारान्त words that we could come across....

Masculine: गुरु Guru, भानु sun, राहु Rahu, केतु Ketu, रघु Raghu, पुरु Puru,

Feminine: धेनु cow, शरयु Sharayu, रेणु dust, चञ्चु beak, रज्जु rope, हनु chin,

Feminine: वधू bride/ daughter- in - law, चमू army, जम्बू plum,
श्वश्रू mother-in-law, तनू body

Neuter: मधु honey/ sweet, दारु wood, जानु knee, वस्तु thing, वसु wealth,
अश्रु teardrop , श्मश्रु beard, सानु peak of a mountain.

Supplement 20 will give you the declined forms of the masculine, the feminine and the neuter words. By now you will be quite comfortable with memorizing the tables.....you will have realized how similar the tables all are. It's just a question of being comfortable with the words....that's all.

Over to Appetizer Lesson 32 A.

# Appetizer Lesson 32 A. Exercises with OO!

| Nouns/ Pronouns | Verbs | Avyayas | Adjectives. |
|---|---|---|---|
| द्रोणी bucket<br>नारी, महिला<br>woman. | दीक्ष् 1.A.P. to give mantra deeksa | | आच्छादितः -तं -ता<br>covered |
| कूपः well | प्र + हृ 1 U.P. to attack | | |
| नूपुरः / नूपुरम्<br>anklet | सम् + पीड् (10. P.P. to press.) | | |
| तलम् floor | | | |
| हिमम् / तुषारः<br>snow | | | |
| काकः crow. | | | |

Note: Some उ and ऊ कारान्त words have already been introduced in concept lesson 32.

Translate:

1. Our Guru gives us deeksha.
2. The villager pulled the bucket from the well with a rope.
3. The mother-in -law told the bride , "Wash the clothes, cook the dinner, wipe the floor and press my feet." ( T.V. serials do colour one's creativity, do they not?)
4. The lady went to the market to buy many things.
5. Krishna sat with Arjuna in the chariot between the two armies.
6. The Guru's grace is always on us.
7. The Himalaya's peaks are always covered with snow.
8. That cow's colour is white.
9. The crow attacked the cows with its beak.
10. The thief stole the anklets from the bride.

**********

Appetizer Lesson 32 B. Answers to Lesson 32 A.

1. Our Guru gives us deeksha.
अस्माकं गुरुः अस्मान् / नः दीक्षते ।

2. The villager pulled the bucket from the well with a rope.
ग्रामस्थः रज्ज्वा द्रोणीं कूपात् अकर्षत् ।

3. The mother-in -law told the bride , "Wash the clothes, cook the dinner, wipe the floor and press my feet."
श्वश्रूः वध्वै अकथयत् , " वस्त्राणि प्रक्षालय, भोजनं पच, तलं मार्जय , मम पादौ सम्पीडय ।"

4. The lady went to the market to buy many things.
महिला / नारी वस्तूनि क्रयणार्थं विपणिम् अगच्छत् ।

5. Krishna sat with Arjuna in the chariot between the two armies.
कृष्णः अर्जुनेन सह चम्योः मध्ये रथे उपाविशत् ।

6. The Guru's grace is always on us.
गुरोः अनुग्रहः सदा अस्मासु अस्ति।

7. The Himalaya's peaks are always covered with snow.
हिमालयस्य सानूनि सदा हिमेन/ तुषारेण आच्छादिताः सन्ति।

8. That cow's colour is white.
तस्याः धेनोः / धेन्वाः वर्णः श्वेतः ।

9. The crow attacked the cows with its beak.
काकः चञ्च्वा धेनूः प्राहरत् ।

10. The thief stole the anklets from the bride.
चोरः वध्वाः नूपुरौ / नूपुरे अचोरयत् ।

## From our Library. Lesson 32.C.  Ganesh.

| Nouns/ Pronouns | Verbs | Avyayas | Adjectives |
|---|---|---|---|
| परीक्षा test, exam<br>गणेशः Ganesh | | यतः because | उद्युक्तः - तं - ता<br>prepared, get ready for. |
| गुहः Kartikeya<br>निश्चयः decision | | | शक्तः - तं - ता<br>competent for |
| क्षणः moment | | | श्रेष्ठतरः - तं - ता<br>greater |
| वाहनं vehicle | | | स्थूलः - लं - ला<br>fat |

### गणेशः

गणेशः गुहः च परमेश्वरस्य पार्वत्याः च पुत्रद्वयम् *। एकदा नारदः कैलासपर्वतम् आगच्छत् ।सः एकम् उत्तमं फलं परमेश्वराय अयच्छत्। " फलम् एकम् एव । मम तु पुत्रद्वयम्। किं करोमि?" इति शिवः अचिन्तयत्। अन्ते सः " एकां परीक्षां करोमि " इति निश्चयम् अकरोत्। सः पुत्रयोः आह्वानम् अकरोत्—" यः एतस्य लोकस्य प्रदक्षिणं प्रथमं करोति, तस्मै एव फलं यच्छामि " इति अवदत्। सुब्रह्मण्यः मयूरे असीदत् , लोकस्य प्रदक्षिणं कर्तुम् उद्युक्तः अभवत्। विघ्नेश्वरः तथा कर्तुं न शक्तः , यतः तस्य शरीरं स्थूलम् आसीत् , तस्य वाहनं तु मन्दं गच्छति । क्षणं अचिन्तयत् सः। अनन्तरं जनकम् अपृच्छत्—" हे जनक! एतस्मात् लोकात् श्रेष्ठतरः कः ?" इति । शिवः उत्तरम् अयच्छत्–" पिता माता इति द्वयम् एव लोकात् श्रेष्ठतरम् " इति । "मातापितृप्रदक्षिणं करोमि चेत् , तत् कार्यं लोकप्रदक्षिणस्य समम् एव " इति गणेशः अचिन्तयत् । तथा एव सः अकरोत्। सन्तुष्टः शिवः तस्मै एव फलम् अयच्छत्।

पुत्रद्वयम् * = The addition of द्वयम् to any word, conveys the dual sense BUT is still a singular noun. Therefore : पुत्रद्वयं गच्छति and not पुत्रद्वयं गच्छतः। बालिकात्रयं क्रीडति ( Three girls play). And so on and so forth. More about this in forthcoming lessons.

# Lesson 33. त्वान्त , ल्यबन्त अव्यय s

O.K. folks, once we go through this lesson, we've more or less cracked it. These gems of अव्यय s, make the language simpler still.

Now you'll be able to say....

- Having studied, i am going to the garden to play.
- Having cooked a meal, she is eating it.

पठित्वा , अहं क्रीडितुम् उद्यानं गच्छामि ।

भोजनं पक्त्वा, सा तं खादति ।

The idea that these अव्यय s convey is " having done a particular action.... OR doing a particular action)" Sounds incomplete? It sure does. These अव्यय s cannot be used by themselves in a sentence without specifying what action has followed it.

NOTE: Both त्वान्त and ल्यबन्त अव्यय s convey the same meaning. Dhaatus are converted into a त्वान्त avyaya if it does **not** begin with an upasarga. Dhaatus are converted into a ल्यबन्त avyaya if it begins with an upasarga. So we have a क्षिप्त्वा and a प्रक्षिप्य both meaning "having thrown." Getit? An उप + विश् can only give rise to an उपविश्य , a ल्यबन्त avyaya, simply because it begins with an upasarga. It can never have the त्वान्त alternative.

सः स्नात्वा is incomplete. It would mean...Having bathed, he. What does he do having bathed? He reads. Therefore the correct sentence would be स्नात्वा, सः पठति। Since they are अव्यय s, use them in any tense you'd like..... स्नात्वा, सः अपठत् । Also correct.

Supplement 21 gives you a HUGE list of त्वान्त and ल्यबन्त अव्यय s. If ever the going gets tough, use the त्वान्त अव्यय of the कृ धातु.... स्नानं कृत्वा सः पठति। पठनं कृत्वा, सः क्रीडति । क्रीडनं कृत्वा सः पुनः गृहम् आगच्छति । Instead of.......

स्नात्वा सः पठति। पठित्वा सः क्रीडति । क्रीडित्वा सः पुनः गृहम् आगच्छति ।
(But if you ask me, that's plain chickening out of a situation that can, with a little effort, be mastered!)

- These avyayas also do some gluing stuff and bring two sentences together. For example: He ate. Then he read. खादित्वा , सः अपठत् ।

Do you recall the words in the गुरुभजनस्तोत्रम् …… रक्षित्वा मां क्षणे क्षणे ..? The Guru, having protected me at every moment.... what does he then do? Read that particular line . Believe me, it will be a wonderful surprise when you discover that parts of stotras have slowly begun to make sense. As our vocabulary increases, the entire stotra will begin to unfold itself. And all the effort that has gone into working with Sanskrit this far would have been well worth it.

# Appetizer Lesson 33 A. Exercises with त्वान्त and ल्यबन्त अव्यय s.

| Nouns/ Pronouns | Verbs | Avyayas | Adjectives |
|---|---|---|---|
| अरिः / रिपुः/ शत्रुः<br>enemy | परि + विष्<br>(परिवेषयति)<br>10.P.P. to serve at the table. | पुरः / पुरतः<br>in front of | |

Translate:

1. Having brought vegetables from the market, she placed them in the refrigerator.
2. Climbing the branches of the tree, the monkey again jumped off the tree onto the ground.
3. Having counted the coins, the rich man put them back into the cupboard.
4. The daughter - in - law, having done work, having cooked food, having served her mother - in - law, herself eats.
5. The king's army, having conquered the enemy(use plural), and having bound them, bring them to the king.
6. Having heard the student's question, the teacher wrote the answer on the blackboard.
7. Thus speaking, he kept silent( he stood silent)
8. Having bathed, having sat in front of the Devi, having praised Her, and having performed Her pooja, our Guru sat in meditation.
9. Renouncing( Having let go) wealth, family and home, he went to the forest.
10. Seeing the policeman, the thief ran away.

# Appetizer Lesson 33 B. Answers to Lesson 33 A.

Translated:

1. Having brought vegetables from the market, she placed them in the refrigerator.

विपणेः शाकान् आनीय, सा तान् शीतपेटिकायाम् अस्थापयत्।

2. Climbing the branches of the tree, the monkey again jumped off the tree onto the ground.

वृक्षस्य शाखाः आरूह्य, वानरः पुनः वृक्षात् भूमौ अकूर्दत।

3. Having counted the coins, the rich man put them back into the cupboard.

नानकानि गणयित्वा, धनिकः पुनः तानि कपाटे अस्थापयत्।

4. The daughter - in - law, having done work, having cooked food, having served food to her mother - in - law, herself eats.

वधूः, कार्यं कृत्वा, भोजनं पक्त्वा, श्वश्रूं भोजनं परिवेष्य, स्वयं खादति।

5. The king's army, having conquered the enemy(use plural), and having bound them, bring them to the king.

भूपतेः चमूः, शत्रून् जित्वा, तान् बद्ध्वा , तान् भूपतिम्/ भूपतेः पुरतः आनयति।

6. Having heard the student's question, the teacher wrote the answer on the blackboard.

छात्रस्य प्रश्नं श्रुत्वा , अध्यापकः कृष्णफलके उत्तरम् अलिखत्।

7. Thus speaking, he kept silent( he stood silent)

एवम् उक्त्वा , सः तूष्णीम् अतिष्ठत्।

8. Having bathed, having sat in front of the Devi, having praised Her and having performed Her pooja, our Guru sat in meditation.

स्नात्वा, देव्याः पुरतः उपविश्य , तां स्तुत्वा, तस्याः पूजां कृत्वा, अस्माकं गुरवः ध्याने उपाविशन्।

9. Renouncing( Having let go) wealth, family and home, he went to the forest.

धनं, कुटुम्बं / स्वजनान् / गृहजनान् / गृहं च त्यक्त्वा , सः वनम् अगच्छत्।

10. Seeing the policeman, the thief ran away.

नगररक्षकं दृष्ट्वा , चोरः अपलायत ।

From Our Library. Lesson 33 C. The clever crow.

| Nouns/ Pronouns | Verbs | Avyayas | Adjectives |
|---|---|---|---|
| कोटरः hollow of a tree; cavity | | अनुसृत्य having followed( as in obeying someone's wishes) | धीरः - रं - रा courageous |
| शिशुः young one | | आदाय taking | |
| शिला stone | | अनुगत्य having followed ( as in walk or run behind somebody.) | |
| काष्ठः stick | | | |

चतुरः काकः।

एकस्मिन् वने अनेके काकाः वृक्षस्य शाखासु वसन्ति । (i'm rather worried that we will forget our present tense ....a story in the present tense will refresh our memories.) वृक्षस्य अधः कोटरे एकः सर्पः वसति ।
यदा काकाः प्रातः बहिः आहारार्थं गच्छन्ति, तदा सर्पः वृक्षम् आरुह्य, काकशिशून् खादति ।
काकाः दुःखिताः। तदनन्तरं ते एकं वृद्धं काकं साहाय्यं प्रार्थयन्ति । वृद्धकाकस्य उपदेशम् अनुसृत्य एकः धीरः काकः नदीं गच्छति । तत्र राजकुमारी स्नानं करोति । तस्याः आभरणं नदीतीरे शिलायाम् अस्ति । काकः आभरणम् आदाय वृक्षं प्रति गच्छति । तदा राजकुमार्याः सेवकाः काकम् अनुगत्य वृक्षस्य समीपं गच्छन्ति ।
काकः आभरणं वृक्षस्य कोटरे क्षिपति । सेवकाः तत् दृष्ट्वा कोटरस्य बहिः काष्ठैः ताडयन्ति । सर्पः बहिः आगच्छति । सेवकाः सर्पं मारयन्ति।

# Lesson 34. The विधिलिङ्

To tell you the truth, the whole truth and nothing but the truth, the विधिलिङ् , when i first tried my hand at understanding it, totally foxed me. i was able to figure out this much....

1. The विधिलिङ् ( the potential mood) is something like the लोट् लकार ( the imperative mood.) It is NOT bound by the past, present or the future tense. It can be used , as it is, to express ideas in any time frame.

2. The विधिलिङ् words, help one to express a thought... as in,
Buttermilk should be drunk after a meal.
भोजनानन्तरं तक्रं पिबेत् ।
"You should rest for some time in the afternoons."
मध्याह्ने किञ्चित्-समये शयनं कुर्यात् ।
"All children should pay their respects to their teachers."
बालकाः तेषाम् अध्यापकान् वन्दनं कुर्युः ।
All politicians should be honest.
नीतिज्ञाः न्यायाचाराः भवेयुः ।

| |
|---|
| Even though a thought has been expressed, even though one feels that something ought to be done, yet one can't be sure that those wishes will be fulfilled....in that sense, these wishes aren't commands. One cannot use the लोट् लकार then. One HAS to use the विधिलिङ् । |

3. It converts you into Sherlock Holmes and helps you deduce things like..
"It should rain tomorrow!"
श्वः वर्षेत् !
We should win the cricket match.
वयं गुलिकाक्रीडां जयेम ।

4. It helps express obvious 'matter of fact stuff'...
How can fishes live without water?
मत्स्याः जलेन विना कथं जीवेयुः ?
How would I live without you?
त्वया विना अहं कथं जीवेयम् ?
How will you pass the examination if you do not study?
यदि भवान् न पठति , तर्हि परीक्षायां कथम् उत्तीर्णः भवेत् ?

5. The अस् धातु conveys the meaning " maybe" when used along with the other tenses...for example....
He maybe waiting at the bus-stop for me.
सः मम कृते बसयानस्थानके प्रतीक्षां करोति स्यात् ।

I am not well but I maybe coming to school tomorrow.
मम स्वास्थयं सम्यक् नास्ति परन्तु अहं श्वः विद्यालयम् आगच्छामि स्याम् ।

....and so my efforts to fox the unfoxable continued. i began to list the expressions that would require me to use the विधिलिङ्. And then a miracle happened. As my list grew, so did my understanding. i began to see how obvious it was to not confuse the लोट् लकार with the विधिलिङ्. And i also came across some lovely subhashitas where the विधिलिङ् was used aplenty. I'll try and present a few of those subhashitas over the next few weeks to help you understand the विधिलिङ् 's usage. And there is no time like the present. Go over our Subhashita section before you try your hand at the exercises.

# Lesson 34. A. Exercises with the विधिलिङ्

Translate.

| Nouns/ Pronouns | Verbs | Avyayas | Adjectives. |
|---|---|---|---|
| tea चायम् | | | more अधिकः- कं - का |
| coffee. कापीम् | | | unexpected अनपेक्षितः - तं - ता |
| guest अतिथिः | | | |
| meeting place सभागृहम् | | | |

1. During exams students should/must/ought to study.
2. The Guru should ask the boy a question.
3. A child ought to drink milk, not tea or coffee.
4. Your bag should have money.
5. You should cook a little more food. How else can you serve an unexpected guest?
6. Students should learn the Sanskrit language.( Every self respecting Indian worth his/her salt should be learning Sanskrit.....if you ask me.)
7. In the meeting place of the learned, a fool ought to "wear" silence.
8. Becoming Shiva, (one) should worship Shiva. (use the word यज् 1. U.P. )
9. How would I take a bath without water?
10. How could you go the library without me ?

Lesson 34 B. Answers to Lesson 34 A...Exercises with the विधिलिङ्

1. During exams students should/must/ought to study.
परीक्षासमये छात्राः पठेयुः।

2. The Guru should ask the boy a question.
गुरुः बालकं प्रश्नं पृच्छेत्।

3. A child ought to drink milk, not tea or coffee.
शिशुः दुग्धं पिबेत् न चायं कापीं वा।

4. Your bag should have money.
भवत्याः/ भवतः स्यूते धनं भवेत्।

5. You should cook a little more food. How else can you serve an unexpected guest?
किञ्चित् अधिकं भोजनं पचेत्। अनपेक्षिताय अतिथये भोजनं कथं परिवेषयेत्?

6. Students should learn the Sanskrit language.
छात्राः संस्कृतभाषां पठेयुः।

7. In the meeting place of learned people, a fool ought to "wear" silence.
पण्डितानां सभागृहे, मूर्खः मौनं धारयेत्।

8. Becoming Shiva, (one) should <u>worship</u> Shiva. (use the word यज् 1. U.P. )
शिवं भूत्वा, शिवं यजेत्।

9. How would I take a bath without water?
जलेन विना अहं स्नानं कथं कुर्याम्?

10. How could you go the library without me ?
मत् विना भवान् ग्रन्थालयं कथं गच्छेत्?

# From Our Library. Lesson 34 C. " बाधति " बाधते ।

( i came across this lovely story in the 8th standard text book and wanted to share it with all of you.)

| Nouns/ Pronouns | Verbs | Avyayas. | Adjectives. |
|---|---|---|---|
| भूपालः king | अभिलषति (अभि + लष् 1.U.P. to like.) | अथ then | विख्यातः - ता -तम् famous |
| शिबिका , आन्दोलिका Palaki/palanquin | प्रतिष्ठते (प्र + स्था 1. A.P. to go.) | | प्रसृतः - ता - तम् spread |
| अमात्य : minister | परिवर्तयते to change | | विफलः- ला - लम् non-successful |
| अनभ्यासः Non-Practice/ non-habit. | बाधते (बाध् 1 A.P. to trouble) | | |
| स्कन्धः shoulder | दर्शयति to show | | |
| प्रमादः mistake | | | |

## " बाधति " बाधते ।

अस्ति उज्जयिन्यां विक्रमः नाम भूपालः। प्रजारक्षणपरः ( besides looking after his subjects)अपि सः नित्यं काव्यशास्त्रविनोदेन कालं नयति ( he amused himself by spending time in the study of poetry and science )। कविषु, पण्डितेषु च सत्कारपूर्वकं धनं वितरति ( to distribute) । अतः बहवः कवयः पण्डिताः च प्रतिदिनं तस्य सभाम् आगच्छन्ति ।

योग्यतानुसारेण धनं च लभन्ते । कालिदासः नाम विख्यातः कविवरः विक्रमस्य सभायां राजकविः अस्ति । केचित् कवयः तत् राजकविपदम् ( the post of Royal Poet.)अभिलषन्ति, अतः एव कालिदासेन सह स्पर्धन्ते ।

अथ एकदा कश्चित् पण्डितः चिन्तयति, " उज्जयिनीं गच्छामि, कवित्वं दर्शयामि, नृपात् राजकविपदं च विन्दामि " इति । शीघ्रमेव सः उज्जयिनीं प्रतिष्ठते । " कः अपि महापण्डितः आगच्छति " इति वार्ता उज्जयिन्यां सर्वत्र प्रसृता । प्रमुदितः नृपः विक्रमः पण्डितस्य स्वागतार्थम् अमात्यान् आदिशति ।

पण्डितस्य स्वागतार्थं शिबिकया सह नगरसीमाम् अमात्याः गच्छन्ति । कालिदासः अपि शिबिकावाहकवेषेणान्यैः ( in the guise of a palanquin bearer) वाहकैः सह (along with the other palanquin bearers)गच्छति । सन्तुष्टः पण्डितः शिबिकां प्रविशति । वाहकाः आन्दोलिकां स्कन्धेन वहन्ति । कालिदासः अपि शिबिकादण्डं धारयति । किन्तु अनभ्यासात् शिबिकादण्डः तस्य स्कन्धं पीडयति । अतः सः तं दण्डं स्कन्धात् स्कन्धं पुनः पुनः परिवर्तयते ।

पण्डितः तं पृच्छति,
" अयम् आन्दोलिकादण्डः स्कन्धे बाधति किं तव ? "
तस्य प्रश्ने " बाधति " इति अशुद्धशब्दं वाहकवेषधारी कालिदासः आकर्णयति झटिति वदति च ,
" न तथा बाधते दण्डो यथा 'बाधति ' बाधते । "
( Note: बाधति ...this verb form is incorrect. बाध् is an A.P. धातु । Its correct form is बाधते ।)
पण्डितः चिन्तयति " विक्रमस्य नृपस्य वाहकः अपि मम दोषान् दर्शयति " इति । अतः सः वाहकं पृच्छति, " कः त्वम् ? "
" अहं कालिदासस्य सेवकः " इति वदति कालिदासः ।
' यस्य कालिदासस्य सेवकः अपि मम प्रमादं दर्शयति, तेन महाकविना सह, स्पर्धा विफलैव ' इति विचारेण सः पण्डितः कालिदासमेव शरणं गच्छति । कालिदासः स्वयं तं राजसभाम् आनयति, नृपः तं सत्करोति , सः च आनन्देन स्वनगरं गच्छति ।

*****